# पञ्जाबप्रदेशीयसंस्कतपत्रिकायां ''विश्वसंस्कतस्य'' योगदानम्

**लालाशङ्कर गयावालः**

अस्ति संस्कतपत्रिकायाः सुमहद् आख्यानम्। मानवाः यदैव भाषणे लेखने च समर्थाः सर्वप्रथमं संस्कतगिरा एव। यत्र कुत्रापि किमपि सर्वप्रथमं जातं तदपि संस्कतभाषाप्लावितमेव। शिलालेख–ताम्रपत्र–भित्तिलेखः दूतचारभाटप्रभतिभिः दीयमानाभिः सूचनाभिः संवादैश्च प्रारब्धा पत्रपत्रिका–परम्परा। यद्यपि भारते पत्रकारितायाः विकासः मुगलकालात् गण्यते परमस्य यथार्थज्ञानं ब्रिटिशसाम्राज्यस्य स्थापनानन्तरमेव। भारते संस्कतपत्रिकारितायाः अथ १ जून १८६६ तमवर्षतः जातम्। ''काशीविद्यासुधानिधिः'' संस्कतस्य प्रथमं मासिकं पत्रम् आसीत् यस्य प्रकाशनं राजकीयसंस्कतविद्यालयवाराणसीतः जातम्। अस्य प्रकाशक आसीत् – ई.जे. लाजरूसमहोदयः। अस्य पत्रस्यापरं नाम 'पण्डित' आसीत्। कस्यापि पत्रिकायाः मूलमुद्देश्यं भवति वैविध्यपूर्णानां समाचाराणाम् अनुसंधानात्मकलेखानाम् अनेकेषां जनानां समक्षं प्रचारः प्रसारश्च।

पञ्जाबप्रदेशीय–संस्कतपत्रकारितायां विश्वेश्वरानन्दवैदिकशोध–संस्थानात् प्रकाशितं ''विश्वसंस्कतं'' विशिष्टतमं वर्तते। त्रैमासिक्याः पत्रिकायाः संस्थापकसम्पादकाः श्रीमन्तः विश्वबन्धुमहोदयाः। एषा प्रतिवर्षं चैत्र–आषाढ़–आश्विन्–पौस–मासेषु प्रकाश्यते।

**''विश्वज्योतिः सदा शुभ्रं संस्कतं विश्वमाचरत्।**
**साहित्यस्य सतः सिद्ध्या उदितं विश्वसंस्कतम्।।''**

इति उद्धोषेण बहूनां विदुषां सन्देशेन विद्याप्रदातिर्‍यै सरस्वत्यै समर्पणेन तस्याः स्मरणेन सम्पादकीयेन युक्तेन काव्यनिकुञ्जम्, निबंधाः नाट्यमण्डपं कथा महिलामण्डनम् छात्रप्रबोधः – इत्यादि–विविधविभागैः विभाजिता ''विश्वसंस्कतम'' आविर्भूता।

सर्वविधस्य साहित्यस्य निर्माणमाध्यमत्वेन संस्कतभाषायाः समर्थनं सर्वदिक्प्रचारणञ्चास्य पत्रस्य मुख्यमभिलक्ष्यं वर्तते।
एतस्याः समर्पणं हि –

**''ओं धीधामप्रचेतिन्यै शब्दब्रह्मस्वयंभुवे।**
**भगवत्यै सरस्वत्यै भूयोभूयो नमोनमः।।**
**ज्ञानविज्ञानजीवन्ती सारिणी भयवारिणी।**
**शरणं मे परं भूयाद् मतिमाता सरस्वती।।''**

**विश्वसंस्कतस्य प्रवर्तनम् प्रवर्तकश्च** - २०२० तमे विक्रमाब्दे, तदनुसारिणि १९६३ तमे ईसाब्दे, आचार्यो विश्वबन्धुः पञ्जाबप्रदेशस्य होश्यारपुर–नगरे विश्वेश्वरानन्दवैदिकशोधसंस्थाने 'विश्वसंस्कतम्' नामैतां संस्कतपत्रिकां प्रावर्त्तयत्। विश्वविख्यातस्य विश्वेश्वरानन्द–वैदिकशोधसंस्थानस्य संचालक–पदम् अलंकुर्वाणो वेदविद्याविशारदो वाग्मी शोधकारशिरोमणिः आचार्य–विश्वबन्धुः नैकेषां सारस्वत–साहित्यिक–शैक्षणिक–सामाजिक समारम्भाणां प्रवर्त्तकः प्रेरकश्चा सीत्। असावेव प्रेरणा–पुरुषो 'विश्वसंस्कत' पत्रिकायाः अपि संस्थापकसम्पादको भूत्। 'विश्वसंस्कतस्य' पत्रिकायाः प्रवर्तनावसरे प्राप्तानां सन्देशानाम् अन्यतमस्मिन् अस्मिन् सन्देशे माननीयेन श्रीमता चिन्तामणिदेशमुखेन आचार्य–विश्वबधुं सम्बोध्य इत्थम् आशंसितम् आसीत् –

''भावत्कः उत्साहः सदैव नवनवम् अग्ररूपं प्रस्तौति–इत्येतत् तु भवतो 'विश्वसंस्कत' पत्रिकायाः प्रकाशनयोजनैव प्रमाणयति। अस्याः पत्रिकायाः माध्यमेन प्रस्तौतु भवता प्रतिज्ञाता नवा चिन्तनधारा, नवा च शैली, नूनं नूतनप्राणप्रतिष्ठां विधास्यति संस्कते, यत् खलु संस्कतं विश्वजनीनसंस्कतेः अप्रतिमं वाहनमिव जगति प्रतिष्ठितम्।'' (वि.सं. १,१. प. १) श्रीगौरीनाथशास्त्रिणा पत्रिकायाः शुभारम्भे सन्देशः प्रेषितः –

**''श्रीमद्विश्वेश्वरानन्दसंस्था-संस्थान-साधनैः।**
**विश्वबन्धुप्रयत्नेन जयताद् विश्वसंस्कतम्।।''**

पत्रिकायाः प्रकाशनसमयादारभ्य नैके सम्पादकाः उपसम्पादकाः, सहसम्पादकाश्च सञ्जाताः। प्रथमं दशवर्षं (१९६३–७३) यावत् आचार्य–विश्वबन्धुः संस्थापक–सम्पादकत्वेन अस्याः दिशानिर्देशमकरोत्। तदनु षड्वर्षाणि (१९७४–८० पर्यन्तं) प्राध्यापक–सञ्चालकः श्रीभास्करन् नायरः अपराणि नववर्षाणि (१९८०–८९पर्यन्तं) वेदप्रकाशः वाचस्पतिः अनन्तरम् दशवर्षाणि (१९९०–९९पर्यन्तं) क.र.डा. श्यामदेव पाराशरः तदनन्तरम् आचार्य इन्द्रदत्त उन्नियालः (२०००तः सम्प्रति) सम्पादकाः सञ्जाताः।

अस्मिन्नेव कालान्तरे डॉ. शिवप्रसादभारद्वाजः, डॉ. वीरेन्द्रशर्मा, प्रो. इन्द्रदत्त उनियालः, डॉ. कष्णवेंकटशर्मा, श्रीदुर्गादत्तशास्त्री, श्रीस्वयंप्रकाश–शर्मा च पथक्पथक्कालावधीन् उपसम्पादकत्वेन अस्य कार्यभारं समर्थतया समुदवहन्। प्रो. इन्द्रदत्त उनियालः, प्रो. वेदप्रकाशश्च अस्य सहसम्पादकावपि कंचित्कालम् अवर्तेताम्। श्री पथुरामशास्त्री,

श्रीदेशराजशर्मा च अस्य सहायकसम्पादकत्वेन कार्यं सततं परिश्रेमेण निरवहेताम्।

विश्वसंस्कतस्य परामर्शदातमण्डलसदस्यत्वेन अनेके ख्यातिनामाः विविधविद्वांसः विविधप्रदेशीयाः समये – समये सहायोगिनो भूवन्।

**विश्वसंस्कतस्योपलब्धयः -**

संस्थानसंचालितेषु विविधकार्यकलापेषु अन्यतमं 'विश्वसंस्कते' प्रकाशनं नियमेन अनुवर्त्तते। अस्य संस्थापक–सम्पादक आचार्य–विश्वबन्धुः 'विश्वसंस्कतस्य' दिग्दर्शिकानि लक्ष्याणि विवण्वन् सर्वप्रथम एवाटे निजे सम्पादकीये एवमाचष्ट– ''अतो स्माभिरस्य 'विश्वसंस्कतस्य' माध्यमेन नित्यं तथा प्रयत्नो विधास्यते, यथा भिनवे संस्कतवाङ्मये नवनवा विचारसरणयः पुराणाभिर्मूलायिताभिः परम्पराभिः, स्रोतसां धारा इव स्वोद्गमैः, सन्नद्धा इव सत्यः सुचिरं अनर्गल– प्रवाहं च प्रवहेयुः।'' (वि.सं. १–प, प. ७)

अथ च

''एवन्नाम युगानुरूपिणीं विश्वव्यापिनीं ज्ञानविज्ञान दानप्रदानव्य–पेक्षिणीं प्रवत्तिमनुसन्धानम् इदं अस्मदीयं 'विश्वसंस्कतम्' पत्रं सुरभारती–समाराधन–प्रसङ्गेन पूर्वपुरूष–दायतया धिगतस्य सांस्कतिकस्य धनस्य सुरक्षायै समद्धयै च नूतनपुरातन–समन्वयैकदक् सद्, आकारप्रकार–वस्तुविषयैर्विशेषं कमपि आदधच्च आत्मनः प्रकाशने प्रवर्त्तते।'' इति। (वि.सं. १–प, प. – ८) अत्रा चार्येण यद् – यद् यथाप्रतिश्रुतं प्रत्याशंसितञ्चा सीत्, तत् – तत् तथैव सम्पन्नं, सम्पद्यते च। वेददर्शनव्याकरणज्योतिषा युर्वेदधर्मशास्त्रसाहित्यशास्त्रछन्दःशास्त्रा–दिषु परिनिष्ठितानां, विज्ञानगणितभूगोलेतहास–राजनीतिशास्त्र––समाजशास्त्र–पुरातत्त्वशास्त्र–शिल्पकला–मनोविज्ञान–शिक्षाशास्त्रादिषु चा नेकेषु विद्याक्षेत्रेषु प्रतिष्ठितानां विदुषां प्राचीनपरम्पराप्रतिपादिकाः, समीक्षात्मिकाः नूतनशोधपरकाश्च रचना अस्यां पत्रिकायां प्रकाश्यमानाः सन्ति। नवसाहित्यसर्जन रसिकानां साहित्यकारणाञ्चापि रचनाः सर्वास्वपि साहित्यिक–विधासु–निःबन्धकवितागीतनाटक कथा त्मकथा–जीवनवत्त –यात्रावर्णन–संस्करण–हास्य–व्यङ्ग्य–विनोदरूपासु प्राकाश्यं चान्ति। काले–काले अवसरानुकूला अस्य विशेषाङ्काः अपि प्रकाशिता भवन्ति।

**विश्वसंस्कतस्याङ्काः -**

संस्कतगवेषकाणां कते विश्वसंस्कतस्य सर्वे पि अङ्काः सन्दर्भग्रन्था इव महत्त्वपूर्णा उपयोगिताश्च सन्ति। प्रथमवर्षस्य प्रथमाङ्काद् षष्ठवर्षस्य प्रथमाङ्कं यावत् प्रतिवर्षं चत्वार अङ्काः प्रकाशिताः। तदनन्तरम् अत्र वैविध्यं समापतितम्। यथाहि –

- वर्षत्रयं यावत् एक एव अङ्कः प्रकाशितः (१०.१–४, ११.१–४, १२. १–४) इति।
- नैकबारं अङ्कद्वयं संयुक्ताङ्करूपेण प्रकाशितम्, यथा (२–३, १–२, ३–४)
- सप्तवारं वर्षे अङ्कद्वयमेव प्रकाशितम् – (१३.१–२, ३–४; १४.१–२; ३.४; १५.१–२, ३–४; १६.१–२, ३–४; २४.१–२, ३–४; २५.१–२, २–४; ४०.१–२, ३–४) इति।
- एकवारम् अङ्कत्रयमेकस्यामेव प्रकाशितम, (२५.२–४) इति।
- सप्तदशवर्षे पञ्चाङ्काः प्रकाशिताः (१७.१–२–३–४–५) इति।

**विश्वसंस्कतस्य प्रकाशनविमर्शः -**

प्रथमवर्षस्यारम्भिकादारम्भ (१.१) सप्तवर्षस्य द्वितीयाङ्कं यावत् सर्वे पि लेखाः प्रायः सप्तषु भागेषु विभक्ताः आसन्। तथाहि –

१. **काव्यनिकुञ्जम् -** अस्मिन् प्रभागे काव्यं, गीतं, स्तोत्रं, सुभाषितं समस्यापूर्तिः संस्कतपद्यानि कविताश्च प्रभूतमात्रायां प्रकाशिताः सन्ति। पं. जगदीशझामहोदयेन प्रथयाटराव विश्वसंस्कतप्रशस्ति–रुपेण पद्यानि लिखितानि तथाहि –

**''अथ विश्वसंस्कत' पत्रमेतदनुत्तमं गुणभूषितम्।**
**शब्दादिशास्त्रगविषयमण्डितविग्रहं नहि दूषितम्।**
**बहुकविवचः संभावितं विदुषां मनो तिविनोदकम्**
**मासत्रयेण विकासशीलमन्दमोद सहायकम्।।१।।**

**(वि.स. १.१, प. ११)**

अत्रैव विश्वबन्धुना परीक्षामयं जीवनम् (१.१), अत्र त्रिशत् पद्यानि रचितानि। हरिदत्तशास्त्रिणः 'रम्याशरद्वर्तते' (२.१), पद्मशास्त्रिणः 'हा स्वर्गगतः शास्त्रिमहोदयो पि' (३.२), वैद्य रामस्वरूपशास्त्रिणः 'भातुभारतम्' (४.१), श्रीधरभास्करवर्णेकरस्य 'श्रीशिवराजस्तवनम् (५.१), हरिश्चन्द्ररेणा–पुरस्य 'भीषणं दुर्भिक्षम्' (६.३–४), दुर्गादासगोस्वामिनः 'भवभूतिप्रशस्तिः'

(१०.१–४), श्यामदवेपाराशरस्य 'शंगारशती' (१४.१–२), आचार्य सोमव्रतस्य भास्करस्य 'सूक्तिसुधा' (१६.३–४) इत्यादीनां विविधप्रदेशीय विदुषां वैविध्ययुतानि काव्यानि प्रकाशितानि वर्तन्ते अथच स्वतन्त्ररूपेणापि एको ङ्कः काव्यविशेषाङ्क'रूपेण (२२.२–३) प्रकाशितः।

२. **निबन्धाः** - अत्र विविधविषयकाः प्रौढ़गवेषणात्मकाः लालित्यपूर्णाश्च निबन्धाः प्रकाशिताः सन्ति। यथा हि – वैदिकवाङ्मयं; भाषाविज्ञानं, व्याकरणं, निरुक्तं; दर्शनानि, तन्त्राणि आगमाः, धर्मः, संस्कतिः; स्मतयः, कर्मकाण्डं; गणितं ज्योतिषम्; आयुर्वेदः चिकित्सा स्वास्थ्यं; मनोविज्ञानं व्यक्तित्वविकासः चरित्रनिर्माणं; विज्ञानं शिल्पं; कलाः साहित्येतिहासः, साहित्यालोचना, साहित्यकार–वत्तम्; साहित्यशास्त्रम्; छन्दःशास्त्रं; हास्यव्यङ्ग्यविनोदाः; यात्राघटनास्थानसंस्थाविवरणं, तत्परकं संस्मरणम्; व्यक्तिपरिचयः, जीवनवत्तं, व्यक्तिविषयकं सस्मरणम्; इतिहासः, भूगोलः, पुरातत्त्वविद्या; राष्ट्रं, राजनीतिः, समाजः, परिवार, आचार व्यवहाररीतयः, वेशभूषा; नारी, बालकल्याणं; शिक्षा; संस्कतभाषा, संस्कतपत्रकारिता; पुराणानि च।

३. **नाट्यमण्डपम्** - प्रभागे स्मिन् रूपकस्य विविधविधाः प्रकाशिताः। यथाहि – एकाङ्करूपकं; लघुरूपकम् (४२.१–२), लघुनाटिका (३६.४); भाणः (२.१), प्रहसनम् (४.१) इत्यादीनि रूपकाणि प्रकाशितानि। तत्र नाटकेषु प्रमुखाः प्रकाशिताः वर्तन्ते– गोपालशास्त्रिणः 'नारीनाटकम्' (२.२); हरिदत्तस्य 'वर्णार्जुननामनाटकं (३.२); शिवनाथकेशवछत्रे महाभागस्य 'सिद्धार्थप्रव्रजनं' (६.१–२–३); सुश्रीलीलारावदयालुः इत्यस्याः 'तुलाचल–अधिरोहणं' (६.३–४), पद्मशास्त्रिणः बंगलादेशाभ्युदयं (१०.१–४); श्रीजगदीशप्रसाद– सेमवालस्य 'यमनचिकेतसीयं' (११.१–४); श्रीकष्णदेवसारस्वतस्य 'भिक्षाटनं' (१३.१–२); डॉ. शिवप्रसादभारद्वाजस्य 'हूणपराजयं' (१३.३–४), (१४.१–२); डॉ. मथुरादत्तपाण्डेयस्य 'नारदमोहिनीयं' (१७.३); श्री दुर्गादत्तविद्यालंकारस्य 'तणजातकं' (१६.४); शिवनाथकेशवछत्रे–शास्त्रिणः 'वधूपरीक्षणं' (१६.२); शिवप्रसादभारद्वाजस्य 'स्वातन्त्र्यसुखं' (३४.३); कष्णदत्तशर्मशास्त्रिणः 'राष्ट्रायशरीरविश्राणनम् (३६.२); इत्यादीनि नाटकानि विविधांकेषु प्रकाशितानि वर्तन्ते। तत्र स्वतन्त्ररूपेणापि एक अङ्कः नाटकविशेषाङ्करूपेण (२४.३–४) प्रकाशितः वर्तते।

४. **कथा -** अत्र कथा आख्यायिका बालकथा, लधुकथा, उर्दूकथा, प्रभतयः नैकविधकथाः प्रकाशिताः सन्ति। पत्रिकायाः एकः विशेषाङ्को पि कथाविशेषाङ्करूपेण (२३.३–४) प्रकाशितः वर्तते। काश्चन प्रमुखाः कथाः अत्र प्रस्तूयन्ते। यथाहि – नरेन्द्रनाथचतुर्धुरीणस्य 'विपाकः' (१.१); चारुदेवशास्त्रिणः 'हासविमुखी राजदारिका' (१.१), पशुपतिझामहाभागस्य 'द्वौज्योतिर्विदौ' (१.२); ब्रजनन्दमिश्रस्य 'अनाथता.... सनाथता च' (१.३); सच्चिदानन्दओझामहाभागस्य 'धातुर्विचित्रा गतिः' (१.४); गणेशरामशर्मणः 'स्नेहानुरोधः' (२.३); एन. सुन्दरं महाभागस्य 'कला वा कलाकारो वा' (१०.१–४); डॉ. श्यामदेवपाराशरस्य 'साह्यं प्राणपणेनापि' (१७.४); डॉ. एमस्वरूपरसिकेशस्य 'नेत्रदानं' (सत्यकथा); डॉ. शिवप्रसाद–भारद्वाजस्य 'इयं सुमंगली वधूः' (२८.३–२९.१); डॉ. शिवप्रसादभारद्वाजस्य 'क्वचिदपिकुमाता न भवति (३०.१); वाणीभूषणओंकारप्रसादस्य 'दानशौण्डशिरोमणिकर्ण (३२.३), न दत्तं तद्विद वै गतम् (३३.२), भगवद्भक्तो ंगदसिंहः (३३.४), मानवतावतारभूतो भूपः (३४.१), न्यायादर्शभूतो भूपः (३६.२), अलोभः (३६.३); शिवप्रसादस्य भारद्वाजस्य 'पुरुषद्वेषिणी (३७.२–४), (३८. १–२–३–४); वेदप्रकाशवाचस्पतिनः 'नवयात्रा वा वनयात्रा वा (३९.१), रथस्य चक्रे द्वे (३९.२), विचित्रं वरचयनम् (४०.१–२); डॉ. सत्यव्रतस्य 'चत्वारो हस्ताः' (३९.२), दोषणी (उर्दूकथा) (४०.३–४), अरुन्तुदा व्यथा (४२.१–२) इत्यादयाः सन्ति।

५. **महिलामण्डलम् -** पत्रिकाया एतस्मिन् प्रभागे काषाञ्चन महिलानां कतयः निबन्धाः वा प्रकाशिताः वा जायन्ते स्म प्रारम्भिकेषु एव केषुचित् अंकेषु एष प्रभागः प्रचलित अनन्तरमेव प्रकारकं विभाजनं न दश्यते। यथा हि – जगतावली सूदमहाभागायाः 'हे नारी' (१.१); कलाकारस्याभिनिवेशः (१.२); शक्तिर्भक्तिश्चोभे सापेक्षे (१.४); सुषमा लो– हियायाः 'जर्मनीदेशे संस्कताध्ययनम् (३.३); मनोरमाकुठियालायाः 'संघे शक्तिः कलौ युगे' (५.२) इत्यादयः आसन्।

६. **छात्रप्रबोधः -** संस्थानस्य अन्येषां वा छात्राणां प्रोत्साहनाय छात्रवीथ्याः लेखनकौशलविकासाय च एष प्रभागः प्रकल्पितः। एतस्मिन्प्रभागे छात्राणां रचनाः लेखाः वा प्रकाश्यन्ते स्म। यथाहि – गोपालशास्त्रिणः 'सन्धिज्ञानस्य सरलतमा रीतिः (१.१); मोहनदेवस्य पन्तस्य 'कपकाभिक्षुकस्यात्मकथाया एकं पष्ठम् (१.१); रामेश्वरस्य 'अश्लीलता'

(१.३); चन्द्रप्रकाश – आर्यस्य 'पराविद्या' (२.१); नरदेवस्य 'शिक्षातत्त्वदर्शनम्' (३.२); बलदेवराजगुप्तस्य 'तमिलसंस्कतयोरभेदः (३. ३); कु. आभायाः 'राष्ट्रभाषा (५.२); मनोरमाशर्मायाः 'क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे (५.३) इत्यादयः प्रमुख लेखाः आसन्। सप्तदशवर्षस्य ततीयाङ्कात् (१७.३) एतादग्विभाजनं समाप्तम्। अनन्तरं सर्वे पि विषयाः मिश्रीकताः काव्यकथालेखनाटक–निबन्ध –गद्यकाव्यादयः प्रकाशिताः (१६.४) अङ्कात् पद्यानि 'काव्यम्' कविता सञ्जाता। एवं मिश्रीकत्य प्रायः सर्वे लेखाः समीक्षादिरूपेण प्रकाश्यमाणाः सन्ति।

७. **विशेषाङ्काः** - विशेषाङ्कः कस्यापि पत्रिकायाः विशिष्टं गौरवं भजते। कालक्रमेण प्रायः प्रत्यङ्कं सर्वविधविषयाः प्रकाश्यन्ते परं यदा कदा पारिस्थितिकरूपेण विशिष्टे क्रमे केचन विशेषाङ्काः प्रकाश्यन्ते। विश्वसंस्कते प्रकाशिताः विशेषाङ्काः इत्थं वर्तन्ते –

लालालाजपतराया ङ्कः (३.१); विश्वसंस्कत–सम्मेलना ङ्कः (६.१–२); अखिलभारतीय–प्राच्य–सम्मेलन–विशेषाङ्कः (१६.३); दयानन्द–निर्वाणशताब्दी विशेषाङ्कः (२०.३–४); अखिलभारतीय–प्राच्य–सम्मेलन–विशेषाङ्कः (२१.३–४); काव्यविशेषाङ्कः (२२.३–४); कथाविशेषाङ्कः (२३.३–४); नाटकविशेषाङ्कः (२४.३–४); डॉ. चारुदेवशास्त्रिस्मतिविशेषाङ्कः (२५.२–४); विश्वसंस्कतविशेषांकः (३७. २–४) तथा च ३१.१–२ इत्यङ्कः अनुक्रमणिकारूपेण प्रकाशितः।

८. **पुस्तकसमीक्षा** - पत्रिकायामस्यां काले – काले विविधपुस्तकानां समीक्षा प्रकाशिता। इमानि पुस्तकानि काव्यस्य विविधविधासु सन्ति यथाहि – महाकाव्यं, नाटककाव्यं, गद्यकाव्यं, काव्यं स्फुट–पद्यानि, कथाबन्धः, मुक्तककाव्यं, लघुकाव्यमं, स्तोत्रकाव्यं, लेखसंग्रहः, टीका, आख्यानं, खण्डकाव्यं इत्यादीनि।

तत्रहि – अङ्गुष्ठदानम् (नाटकम्, १.१); अमतमन्थनं महाकाव्यम् (१६.३–४); अर्जुनमालाकारम् गद्यकाव्यम् (१७.३); कल्याणमैत्री कथाबन्धः (४.२); कुटुम्बिनी लघुकाव्यं (२०.३–४); दीपदानम् एकाङ्कीनाटकम् (३.२); नैपाल–साम्राज्योदयम् महाकाव्यं (१८.५); पुष्पहासः स्फुटकवितासंग्रहः (२४.१–२); भाति मे भारतं काव्यं (२०.

३४); मद्वीका मुक्तककाव्यं (२२.१); संस्कतनिबन्धादर्शः (१७.५); सन्ध्या लघुप्रेक्षणकं (२.४); सुगतार्थमाला, लकारार्थविवरणम् (२.३)।

६. **उपसंहारः** - इत्थं वैविध्यपूर्णायां परिस्थित्यामपि 'विश्वसंस्कतम्' निर्बाधगत्या सततं विविधज्ञानविज्ञानयुतं प्रकाश्यते। उनविंशतिशताब्द्यां पत्रपत्रिकाप्रकाशनस्य यन्मूलमुद्देश्यमासीत् तत्तु विशतिशताब्द्यां परिवर्तितं, तत्रापि स्वातन्त्र्योत्तरे भारते तस्य विकसितं रूपं वयं पश्यामः। अस्मिन् काले प्रायः सर्वकारीयसंरक्षेणन संरक्षिताः पत्रिकाः एव निरन्तरं प्रकाशमाणाः दश्यन्ते। संस्कतं प्रति निष्ठा लोकजागरणं विश्वशान्तिमूलकभावना–संस्कतशिक्षणार्थ–प्रचारार्थ–प्रसारार्थ–ग्रन्थादि –प्रकाशनार्थ अनुसंधानात्मक–निबन्धप्रकाशनार्थमेव पत्रिकायाः मूलमुद्देश्यम्। अस्माभिः संस्कतज्ञैः पत्रिकाप्रकाशनार्थम् अवश्यमेव सहयोगः प्रदातव्यः सम्पादकान् प्रति उत्साहः स्थापनीयः। विश्वसंस्कतं स्वस्वच्छशुद्ध–प्राञ्जललिपिभिर्नयनाभिरामचित्राङ्कणैः पाठकापेक्षित–मन– स्तोषसामग्रीभिः विविधविषयकगवेषणात्मकलेखैः अद्यापि संस्कतजगति प्रसिद्धतां लोकप्रियतां च संवर्धयति। संस्कतसंस्कतिज्ञानार्थं रक्षणार्थं प्रचारप्रसारार्थञ्चैषा पत्रिका अवश्यमेव पठनीया।

*विभागाध्यक्षः संस्कतस्य*
*रामेश्वरीदेवी राजकीय स्नातकोत्तर–*
*कन्यामहाविद्यालयः*
*भरतपुरम् – ३२१ ००१*

———०००———